श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये पञ्चविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये पञ्चविंशं दशकम् ॥

## नरसिंहावतारवर्णनम्

स्तम्भे घट्टयतो हिरण्यकशिपोः कर्णौ समाचूर्णय -
न्नाघूर्णज्जगदण्डकुण्डकुहरो घोरस्तवाभूद्रवः।
श्रुत्वा यं किल दैत्यराजहृदये पूर्वं कदाप्यश्रुतं
कम्पः कश्चन सम्पपात चलितोऽप्यम्भोजभूर्विष्टरात् ॥ 25.1 ॥

दैत्ये दिक्षु विसृष्टचक्षुषि महासंरम्भिणि स्तम्भतः
सम्भूतं न मृगात्मकं न मनुजाकारं वपुस्ते विभो।
किं किं भीषणमेतदद्भुतमिति व्युद्भ्रान्तचित्तेऽसुरे
विस्फूर्ज्जद्धवलोग्ररोमविकसद्वर्ष्मा समाजृम्भथाः ॥ 25.2 ॥

तप्तस्वर्णसवर्णघूर्णदतिरूक्षाक्षं सटाकेसर -
प्रोत्कम्पप्रनिकुम्बिताम्बरमहो जीयात्तवेदं वपुः।
व्यात्तव्याप्तमहादरीसखमुखं खड्गोग्रवल्गन्महा -
जिह्वानिर्गमदृश्यमानसुमहादंष्ट्रायुगोड्डामरम् ॥ 25.3 ॥

उत्सर्पद्वलिभङ्गभीषणहनु ह्रस्वस्थवीयस्तर -
ग्रीवं पीवरदोश्शतोद्गतनखक्रूरांशुदूरोल्बणम्।
व्योमोल्लङ्घि घनाघनोपमघनप्रध्वाननिर्द्धावित -
स्पर्धालुप्रकरं नमामि भवतस्तन्नारसिंहं वपुः ॥ 25.4 ॥

नूनं विष्णुरयं निहन्म्यमुमिति भ्राम्यद्गदाभीषणं
दैत्येन्द्रं समुपाद्रवन्तमधृथा दोर्भ्यां पृथुभ्याममुम्।

वीरो निर्गलितोऽथ खड्गफलकौ गृह्णन् विचित्रश्रमान्
    व्यावृण्वन् पुनरापपात भुवनग्रासोद्यतं त्वामहो ॥ 25.5 ॥

भ्राम्यन्तं दितिजाधमं पुनरपि प्रोद्गृह्य दोर्भ्यां जवात्
    द्वारेऽथोरुयुगे निपात्य नखरान् व्युत्खाय वक्षोभुवि।
निर्भिन्दन्नधिगर्भनिर्भरगलद्रक्ताम्बु बद्धोत्सवं
    पायं पायमुदैरयो बहु जगत्संहारिसिंहारवान् ॥ 25.6 ॥

त्यक्त्वा तं हतमाशु रक्तलहरीसिक्तोन्नमद्वर्ष्मणि
    प्रत्युत्पत्य समस्तदैत्यपटलीं चाखाद्यमाने त्वयि।
भ्राम्यद्भूमि विकम्पिताम्बुधि कुलं व्यालोलशैलोत्करं
    प्रोत्सर्पत्खचरं चराचरमहो दुःस्थामवस्थां दधौ ॥ 25.7 ॥

तावन् मांसवपाकरालवपुषं घोरान्त्रमालाधरं
    त्वां मध्येसभमिद्धकोपमुषितं दुर्वारगुर्वारवम्।
अभ्येतुं न शशाक कोपि भुवने दूरे स्थिता भीरवः
    सर्वे शर्वविरिञ्चवासव मुखाः प्रत्येकमस्तोषत ॥ 25.8 ॥

भूयोऽप्यक्षतरोषधाम्नि भवति ब्रह्माज्ञया बालके
    प्रह्लादे पदयोर्नमत्यपभये कारुण्यभाराकुलः।
शान्तस्त्वं करमस्य मूर्ध्नि समधाः स्तोत्रैरथोद्गायत -
    स्तस्याकामधियोऽपि तेनिथ वरं लोकाय चानुग्रहम् ॥ 25.9 ॥

एवं नातितरौद्रचेष्टित विभो श्रीतापनीयाभिध -
    श्रुत्यन्तस्फुटगीतसर्व महिमन्नत्यन्तशुद्धाकृते।
तत्तादृङ्निखिलोत्तरं पुनरहो कस्त्वां परो लङ्घयेत्
    प्रह्लादप्रिय हे मरुत्पुरपते सर्वामयात्पाहि माम् ॥ 25.10 ॥

॥ इति श्रीमन्नारायणीये पञ्चविंशं दशकं समाप्तम् ॥